१८ 13. वास्तुपूजनं. सम्पूर्ण.
पत्र - 18

1318

9"×5"

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गृहवास्तुचक्रमिदं शुभकृतं लेः शिख्यादित्रिपंचा
शद्देवताः॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ अथ गृहप्रासादादिवास्तुपूजापद्धतिः ॥ तत्र जीर्णोद्धारेउ
द्यानेनववेश्मनि नवप्रासादभवने प्रासादपरिवर्त्तने प्रासादगृहद्वाराभिवर्त्तने च
वापीकूपतडागारामेषु गृहप्रवेशे दीक्षायां मंडपकरणे च वास्तूपशमनं कुर्यात्
अथ गृहप्रवेशकालो नारदीये ॥ माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः ॥ प्र
वेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः ॥ आश्विन्यां मे च वरुणत्वाष्ट्र मित्रस्थि
रोडुये ॥ शुभः प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोः ॥ शान्यर्कवारलग्नेषु रिक्तामाः
परिवर्जिताः ॥ श्रीपतिः ॥ रिक्तातिथिर्भूसुनभानुवारौ निंद्याश्च योगाः परिवर्ज्ज
नीयाः ॥ मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवेशे हि नराधिपानां ॥ राजमार्त्तंडे

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हस्तःपुष्यपुनर्वसूशतभिषास्वातीतथारेवती । रोहिण्युत्तरभत्रयंहरिमृगामूलानुरा
धामघा ॥ कन्याकुंभवृषालिसिंहमिथुनस्वर्क्षस्थिरान्सुयुग्मे वाराजीवशनिज्ञ
सोमभृगुजावेश्मप्रवेशेशुभाः ॥ स्वर्क्षगृहपतेर्जन्मलग्नंजन्मराशिर्वा ॥ प्रवेशल
ग्नमाह ॥ श्रीपतिः ॥ केंद्रच्छिद्रव्ययैःशुभैःक्रूरैःषष्ठायगैर्गुरौ ॥ लग्नेभृगौवाकें
द्रेवास्थिरयाम्योदयेविशेत् ॥ त्रिकोणगाकेंद्रगैःशुभैःक्रूरकंटकाष्टमांत्यगैः ॥ अ
स्तग्रहैःस्थिरोदयेगृहंविशेद्बलेविधौ ॥ अन्यत्रगृहारंभकालएवगृहीतः ॥ तथा
हः ॥ गृहारंभोदितैर्मासैर्धिष्ण्यैर्वाप्रविशेद्गृहम् ॥ विशेत्सौम्यायनेहर्म्यंतृणागा
रंतुसर्वदा ॥ गृहप्रवेशविधिमाहमहेश्वरः ॥ कृत्वादौवास्तुपूजांजलभृतकलशा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा०पृ०॥ नश्चान्मरागं च्छायनोर्क्कि वामं हत्वा थ कार्येन वनर भवनेनो रणाद्ग्ले प्रवेशः॥ वशि
॥२॥ ष्ठः॥ कृत्वा शुक्रं पृष्ठतो वामनोर्क्कं विश्रान् पूज्यानयनैः पूरगिकुंभम्॥ हर्म्यें रम्यं नार
रीः स्त्रग्विनानैः स्त्रीभिः स्त्रग्वीगीनवाद्यैर्विशेत्॥ वामगनार्क्कं ज्ञात्वा नोपायो विश्व
कर्म्मीक्तः॥ लग्नान्नागाहिनो हि स्तु वो वौ राशी नियोजयेत्॥ एकमेकं न्यसेन्को
रण स्तूर्यं वामे विचिंतयेत्॥ विश्वकर्म्म॥ हटाकारं लिखेच्चक्रं विधिहर्म्याक्रमेण
च॥ मुखेकं हिस्तु चत्वारि चत्वारि गर्भ एव च॥ गले द्वौ तिग्गुह्ये द्वौ शिरख्याहौ स्था
पयेत्क्रमात्॥ एवं चक्रं समालिख्य प्रवेशार्थं सदा बुधैः॥ फलनिर्देशस्तत्रैव॥ ॥राम:॥
श्चग्निनाशो मुखे प्रोक्तः उद्वासः पूर्वतो भवेत्॥ दक्षिणो चार्थलाभश्च पश्चिमे ॥२॥

कलशवास्तु· सूर्य्यभान्नक्ष त्रातफलम०								
	व·	पू·	द·	प·	उ·	ग·	गु·	क·
	१	४	४	४	४	४	३	३
	अ·	उ·	ला·	श्रे·	क·	वि·	स्थि·	स्थि·

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मेयसंपदः॥ उग्ररेकलहश्चैवगर्भेगर्भविनाशनम्॥ स्थिरताचयुगेकेराठकलशास्यप्रकी
र्तिता॥ वास्तुपुरुषोत्पत्तिमाहकपिलपंचरात्रे॥ पूर्वमासीन्महाभूतः सर्वभूतभयंकरः
सदैवैर्निहतोभूमौसवास्तुपुरुषः स्मृतः॥ यावद्भूमिस्थिरालोकेतावद्वास्तुसुरः स्थि
तः॥ संसारस्तुलयंयातिदेवैः सर्वग्रहादिभिः॥ विस्तारोस्यसमंतात्त्वशतकोटिस्तुयो
जनः॥ संस्थितोसौधरांव्याप्यप्रोत्तानः कृष्णवर्णकः॥ जानुकूर्परकौवास्तोर्वह्निवायु
प्रकोष्ठगो॥ पितृपादपुटश्चापमित्रामूर्ध्न्यपदंजलिः॥ ऊर्ध्वकेशः सुपीनश्चवर्तुलाक्षोऽ
सुराकृतिः॥ अन्यत्राधोमुखंवप्रोक्तो भाग्वैशानमावाहसुरेनिकायोदेवैः पुराहत
वरोभिभूज्यः॥ शेतेसभूम्यांप्रविसार्यपादौहस्तौतथाधोवदनंसदैव॥ ईशानेऽ

६२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्वशिरोनिवेशितमस्तकास्तोभ्यतेर्मारुतेर्वक्रोवापिकरद्वयंपद्मयुगंनक्रंचराशिस्थितम्॥
अथप्रयोगः॥तत्रप्रथमंयजमानःशुचिदिनेकृताभ्यंगःकृतमंगलस्नानःपरिहिताहतवासाः॥
कृतनित्यक्रियःसपत्नीकःप्राङ्मुखोमुख्यगृहेउपविश्य॥प्राणानायम्यदेशकालौसं
कीर्त्यास्मिन्गृहेसर्वासामायुष्यारोग्यक्षेमैश्वर्याभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं
अस्यवास्तोःशुभत्वसिद्ध्यर्थंचनवग्रहमखपूर्वकंवास्तुपूजनमहंकरिष्ये॥तदंगंस्व
स्तिपुण्याहवाचनंमातृपूजनंनांदीश्राद्धमाचार्यादिवरणंचाहंकरिष्ये॥इति
संकल्प्यषोडशोपचारैर्गणपतिंसंपूज्ययथाशाखंपुण्याहंवाचयित्वा॥
गौर्यादिषोडशमातृःब्राह्म्यादिसप्तमातृःप्रतिमासुभित्तौपटेवालिखिता

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सुब्रह्मनपुंजेषुवाष्ट्रामाष्ट्रस्यापयित्वानाममंत्रेणषोडशोपचारैःपूजयेत् ॥ एवंमानपूजां
कृत्वाआभ्युदयिकंश्राद्धंकृत्वा ॥ आचार्यब्रह्मऋत्विजांवरणंकुर्यात् ॥ तद्यथा ॥ अंजलिं
विधाय ॥ सत्वीकंवेदविदंसदाचारकंचिंतयेत् ॥ ब्राह्मणःअस्मिन्वास्तुपूजनकर्मणिआ
चार्यकर्मकर्तुंत्वामहंप्रार्थयेइतिप्रार्थयित्वानेनांगीकृतेफलहिरण्यादिनाअस्मि
न्वास्तुपूजनकर्मणिअमुकगोत्रंअमुकवेदांतर्गतामुकशाखाध्यायिनंअमुकशर्माणंअमु
कगोत्रोऽमुकशर्माहंत्वामाचार्यत्वेनवृणेइतिवृत्वा ॥ आचार्यस्तुयथास्वर्गेशक्रादीनांवृ
हस्पतिः ॥ तथात्वंममयज्ञेऽस्मिन्आचार्योभवसुव्रतइत्युक्त्वा ॥ वासोऽलंकारमधुपर्कादिना
पूजयेत् ॥ एवंब्रह्मऋत्विजोपि ॥ तत्रप्रार्थनामंत्रः ॥ यथाचतुर्मुखोब्रह्माशक्रादीनांपितामहः
तथात्वंममयज्ञेऽस्मिन्ब्रह्माभवद्विजोत्तम ॥ १ ॥ अस्ययागस्य[illegible]निष्पत्तौभवंतोऽभ्य

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा०सू०॥ र्थिनामया॥ सुप्रसन्नाः प्रकुर्वंतु शांतिकं विधिपूर्वकम्॥ २ ॥ ऋग्वेदः पद्मपत्राक्षो गायत्रः सो
॥४॥ मदैवतः॥ अत्रिगोत्रस्तु विप्रेंद्र आत्विक्त्वं मे मखे भव॥ ३ ॥ कानराशोयजुर्वेद त्रैष्टुभो वि
ष्णुदैवतः॥ काश्यपेयस्तु विप्रेंद्र आत्विक्त्वं मे मखे भव॥ ४ ॥ सामवेदस्तु पिंगाक्षो जागतः
शक्रदैवतः॥ भारद्वाजस्तु विप्रेंद्र आत्विक्त्वं मे मखे भव॥ ५ ॥ बृहन्नेत्रोऽथर्ववेदोऽनुष्टु
भो रुद्रदैवतः॥ वैशंपायन विप्रेन्द्र आत्विक्त्वं मे मखे भव॥ ६ ॥ ततश्चाचार्यः प्राणा
नायम्य देशकालौ संकीर्त्य॥ आचार्यकर्म करिष्ये इति संकल्प्य॥ सर्वत्र गौरस
र्षपान् विकिरेत्॥ तत्र मंत्रः॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्य
क्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ १ ॥ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ॥रामः॥
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ २ ॥ अपक्रामंतु भूतानि पिशाचाः स ॥४॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

र्वनोहिशाम्॥ सर्वेषामविरोधेनयज्ञकर्मसमाचरेत्॥ ३॥ ततःपंचगव्येनकुशैःसर्वप्रोक्षणं
कार्य्यम्॥ शुचीवोहव्येतिमंत्रेन॥ शुचीवोहव्यामरुतःशुचीनांशुचिंहिनोम्यध्वरंशु
चिभियः॥ ऋगेनसत्यंऋतशापआपन्नशुचिजन्मानःशुचयःपावकाः॥ ४॥ अग्निशुचि
व्रततमहशुचिरविप्रःशुचिःकविःशुचीरोचतआहुतः॥ उदग्नेशुचयःतवशुक्राभ्राज
तईरतेतेनवज्यातिंषंसीअर्चयः॥ ५॥ ब्राह्मणेनसुभ्रमृतथंहितंएनदेवा॥ आत्मानंपु
ननेसहानेनसहस्रधारेणपावमान्यःपुनातुमाप्राजापत्यंपवित्रंशतोद्यामहिर
ण्मयम्॥ तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे इंद्रःसुनीतीसहमापुनातुसोमःस्वस्तिय
वसुरुराउःसमीक्ष्याजातवेदामूर्जयंत्यापुनातु॥ ३॥ इमाःऋग्वेदऋचः॥ आपोहिष्ठे
तित्र्यृचेनच॥ ततोगृहमध्येयज्ञमानेक[illegible]हस्तमात्रप्रमाणंचतुरस्रंसैयानिवे

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा॰सू॰॥ कंत्रिमेखलंकुंडस्थंडिलं वा विधाय तदीशान्यां चतुरंगुलोच्छ्रितां वेदिमेकहस्तां वि
॥५॥ धाय तद्दक्षिणतो गृहवेदीं च कुर्यात्॥ पंचरात्रे तु॥ अष्टाहस्तवेदिः प्रोक्ता गृह प्रसाद
कूपानां मंडपस्य जलस्य च॥ वास्तु मण्डलकं कार्यं मध्ये हस्तं तु नापरमिति॥ वास्तु
मण्डल चतुष्कोणेषु चतुरो लोहकीलान् ईशानादिप्रदक्षिणक्रमेणारोपये
त्॥४॥ तत्र मंत्रः॥ विशं तु भूतले नागा लोकपालाश्च सर्वतः॥ अस्मिन् गृहेऽवतिष्ठंतु
गृह५ आयुर्बलकराः सदा॥ प्रासादादौ शब्दउहनीयः प्रतिरोपणमंत्रावृत्तिः॥ ततः
तोपरणक्रमेण शंकुपार्श्वे॥ अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः
तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति मंत्रेण माषबलिं दत्वा॥ तन्मध्ये
विष्णुपरिवस्त्रादौ रक्तादिकनककमालाकया रत्नेन वा तदसंभवे रजतपुष्पफ
धान्यानामन्यतमेन॥ शांता॥१॥ यशोवती॥२॥ कांता॥३॥ विमला॥४॥ प्रा

केसरि२ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः। बलिं ते भ्यः प्रयच्छामि ×
सर्वे ते ह्यनुमंत्रितम १ ॐ नमो वायुरक्षोभ्यो ये चान्य तान्स माश्रिताः।
CC-0 Uma Raman Jha Collection. Digitized by eGangotri
बलिं ते भ्यः प्रयच्छामि ... मुत्तमम् २ रुद्रेभ्यश्चैव सर्वेभ्यो ये ×
चान्ये तान्समाश्रिताः। बलिं ते भ्यः प्रयच्छामि तेग्रऋतु सतोस्तुकाः ३॥३

[illegible] माला ३
राम:॥
॥५॥

॥ वा० पू० ॥ कलशं संस्थाप्य वास्तुमंडलं गत्वा ॥ ईशानकोणपदादारभ्य ॥ अथोमुखपतितं वास्तु
॥ द्व ॥ पुरुषे हिरणपफलपुनपुल्कानं तुलैः शिख्यादिदेवताः प्रणवाद्येस्तु चतुर्थ्यंतैर्नमोन्तैर्व
र्णमाणानामभिरावाह्य स्थापयेत् ॥ तत्रेशानकोणपदे शिरसि शिखिनमेकपदम्
क्षि ॥ १ ॥ तद्दक्षिणपदे दक्षिणनेत्रे पर्जन्यमेकपदम् ॥ २ ॥ दक्षिणपदे तदधःपदे च श्रोत्रे जयं
तं द्विपदम् ॥ ३ ॥ तद्दक्षिणपदे तदधःपदे च स्कंधे कुलिशायुधं द्विपदम् ॥ ४ ॥ तद्दक्षिण
पदे तदधःपदे च दक्षिणबाहौ सूर्यं द्विपदम् ॥ ५ ॥ तद्दक्षिणपदे तदधःपदे च दक्षि
णप्रबाहौ सत्यं द्विपदम् ॥ ६ ॥ तद्दक्षिणपदे तदधःपदे च बाहौ भृशं द्विपदम् ॥ ७ ॥ त
द्दक्षिणपदे प्रबाहौ आकाशमेकपदम् ॥ ८ ॥ तद्दक्षिणपदे आग्नेयकोणे प्रबा ॥ रामः ॥
हौ वायुमेकपदम् ॥ ९ ॥ अथ मंडलदक्षिणभागे वायुपदाधःपदे मणिबंधे पूषणं ह ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गवाहिनी ॥५॥ सन्नतिः ॥६॥ सुमना ॥७॥ नंदा ॥८॥ सुभद्रा ॥९॥ सुरथा ॥१०॥ इति नमोन्तैर्नाम
भिरीशप्रागायताः ॥ दक्षिणोपक्रमा उदगपवर्गा रेखाः कृत्वा ॥ हिरण्या ॥१॥ सुव्रता ॥२॥ ल
क्ष्मी ॥३॥ विभूति ॥४॥ विमला ॥५॥ प्रिया ॥६॥ जया ॥७॥ काला ॥८॥ विशोका ॥९॥ इडा ॥१०॥ इति
दक्षिणोत्तरायताः ॥ पश्चिमोपक्रमाः पूर्वापवर्गा रेखा नमोन्तैर्नामभिः कुर्यात् ॥ एवमे
काशीतिपदं मंडलं संपद्यते ॥ तन्मध्यस्थनवकोष्ठानि रेखामार्जनेनैकीकुर्यात् ॥ एत
न्नवपदं ब्रह्मस्थानम् ॥ तस्य चतुर्दिक्षु चत्वारि त्रिपदानि ॥ विदिक्षु शृंखलाकार्याणि
द्वादश ॥ कोणचतुष्टयो द्वाष्टाविंशतिविंशत्येकपदानि अवशिष्टानि प्रतिदिशं पंच पं
चेति विंशतिर्द्विपदानि इति ॥ ततः कुंडस्थंडिले वाग्निप्रणयनं विधाय ॥ दक्षिणवेद्यां
नवग्रहमंडलं विलिख्य ॥ नवग्रहस्थापनं कृत्वा षोडशोपचारैः संपूज्य ॥ नदीशान्यां

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मेकपदम् ॥ १० ॥ नदधःपदेन उत्तरे पदे च दक्षिणपार्श्वे विनथं द्विपदम् ॥ ११ ॥ नदधःपदेन उत्तर
पदे च दक्षिणपार्श्वे यूदक्षनं द्विपदम् ॥ १२ ॥ नदधःपदेन उत्तरपदे च दक्षिणोरुभागे यमं द्वि
पदम् ॥ १३ ॥ नदधःपदेन उत्तरपदे च दक्षिणजानुनि गंधर्वं द्विपदम् ॥ १४ ॥ नदधःपदेन उत्तरपदे
च दक्षिणजंघायां भृंगराजं द्विपदम् ॥ १५ ॥ नदधःपदे दक्षिणस्फिचि मृगं एकपदम् ॥ १६ ॥ नद
धःपदेन नैऋत्यकोणे पादयोः पितृगणमेकपदम् ॥ १७ ॥ अथ मंडलपश्चिमभागे ॥ नैऋतिको
णान्नरपदे वामस्फिचि दौवारिकमेकपदम् ॥ १८ ॥ न उत्तरपदेन ऊर्ध्वपदे च वामजंघायां सु
ग्रीवं द्विपदम् ॥ १९ ॥ न उत्तरपदेन ऊर्ध्वपदे च वामजानुनि पुष्पदंतं द्विपदम् ॥ २० ॥ न उत्तरपदे
न ऊर्ध्वपदे च वामोरौ वरुणं द्विपदम् ॥ २१ ॥ न उत्तरपदेन ऊर्ध्वपदे च वामपार्श्वे असुरं द्वि
पदम् ॥ २२ ॥ न उत्तरपदेन ऊर्ध्वपदे च वामपार्श्वे शोषं द्विपदम् ॥ २३ ॥ न उत्तरपदे वाममरिण

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ वा० पू० ॥ वंधे पापमेकपदम् ॥ २४ ॥ नउत्तरमोहे वायव्यकोणपदे वामप्रबाहौ रोगमेकपदम् ॥ २५ ॥ अ
॥ ७ ॥ यमंडलोत्तरभागे ॥ वायव्यकोणपदोर्ध्वपदे वामबाह्वावह्निमेकपदम् ॥ २६ ॥ नऊर्ध्वपदेनद
क्षिणपदे च वामकूर्परे मुख्यं द्विपदम् ॥ २७ ॥ नऊर्ध्वपदेनदक्षिणपदे च वामबाहौ भल्लाटं
द्विपदम् ॥ २८ ॥ नऊर्ध्वपदेनदक्षिणपदे च वामप्रबाहौ सोमं द्विपदम् ॥ २९ ॥ नऊर्ध्वपदेनदक्षि
न्यं ५ णपदे च अंसे पर्प्यं द्विपदम् ॥ ३० ॥ नऊर्ध्वपदेनदक्षिणपदे च वामश्रोत्रे अदितिं द्विपदम् ॥ ३१ ॥
नऊर्ध्वपदे वामनेत्रे दितिमेकपदम् ॥ ३२ ॥ नतः शिषिपदाधःस्थितकोणपदे मुखे अपः ए
कपदम् ॥ ३३ ॥ वाउपदाधःकोणपदे दक्षिणहस्ते सावित्रमेकपदम् ॥ ३४ ॥ पितृगणोर्ध्व
कोणपदे मेढ्रे जयंतमेकपदम् ॥ ३५ ॥ रोगोर्ध्वकोणपदे वामहस्ते रुद्रमेकपदम् ॥ ३६ ॥ ॥ रामः ॥ ॥ ७ ॥
ननआपपदाधःस्थितईशानकोणपदे दक्षिणपदत्रयेद क्षिणस्तने अर्यमणं त्रिपदम् ॥ ३७ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

न दक्षिणाग्नेयकोणपदे दक्षिणहस्ते सवितारमेकपदम् ॥ ३८ ॥ नदधःपदत्रयजठरद
क्षिणभागे विवस्वन्तं त्रिपदम् ॥ ३९ ॥ नदधोनैर्ऋत्यकोणपदे द्वयोर्विबुधाधिप
मेकपदम् ॥ ४० ॥ न उत्तर पदत्रयजठरवामभागे मित्रं त्रिपदम् ॥ ४१ ॥ न उत्तरवायव्यकोणपदे
वामहस्ते राजयक्ष्माणमेकपदम् ॥ ४२ ॥ न ऊर्ध्वपदत्रये वामहस्ते पृथ्वीधरं त्रिपदम् ॥ ४३ ॥
न ऊर्ध्व ईशानकोणपदे वक्षःस्थले आपवत्समेकपदम् ॥ ४४ ॥ मध्ये नवपदे हृदये ब्रह्मा
णम् ॥ ४५ ॥ नन उत्तरे हृदये वास्तुम् ॥ ४६ ॥ वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् ॥ ० ॥ ॐ वा
स्तोष्पते प्रतिजानीह्यस्मानिति मंत्रेण स्थापयेत् ॥ सचसुवर्णस्वरूपस्सवा ननन ई
शानकोणचतुष्टये मंडलाद्बहिः ॥ चरकीं ॥ १ ॥ विदारीं ॥ २ ॥ पूतनां ॥ ३ ॥ पापराक्षसीं ॥ ४ ॥
पूजयेत् ॥ बहिरेव पूर्वादिदिक्षुक्रमेण ॥ स्कंदम् ॥ १ ॥ अर्यमणम् ॥ २ ॥ जृंभकम् ॥ ३ ॥ पिलि

वास्तोष्पते ध्रुवास्थूणां सत्रं सोम्यानाम् ॥ द्रप्सः पुरां भेत्ता शश्वतीनामिंद्रो मुनीनां सखा ४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

||वा०पू०|| पिरुद्धं॥ ततः इन्द्रादिलोकपालान्क्रमेण पूजयेत्॥ एवमावाह्य आसनाद्युपचारैः प्रण
||८|| वादिनमोन्तैर्नाममंत्रैः पूजयेत्॥ ततो मंडलाद्दक्षिणतः कलशं संस्थाप्य॥ तत्र मंत्रः॥
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्॥ पिपृतान्नो भरीमभिः॥१॥ इति भूमिं
स्पृष्ट्वा॥ ओषधयः समवदन्त सोमेन सह राज्ञा॥ यस्मै कृणोति ब्राह्मणस्तं
राजन्पारयामसि॥२॥ इति यवान्क्षिप्त्वा॥ आजिघ्र कलशे इति कलशं संस्थाप्य
इमं मे वरुण श्रुधी हवमद्या च मृडय॥ त्वामवस्युराचके॥४॥ इति जलेनापूर्य॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये
श्रियम्॥ इति गंधं क्षिप्त्वा॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनै नु
बभ्रूणामहं शतं धामानि सप्त च॥५॥ इति सर्वौषधीः दूर्वाः क्षिप्त्वा॥ ||राम:||
||८||

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कांडात्कांडात्प्ररोहंती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ६ ॥ इति दूर्वाः क्षि
प्त्वा ॥ अश्वत्थेवो निषदनं पर्णेवो वसतिः कृता ॥ गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ७ ॥
इति पंचपल्लवान् ॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी यच्छानः शर्म्म सप्रथाः ॥ ८ ॥ इति पं
चमृदः ॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो मुंचंत्वं
हसः ॥ ९ ॥ इति फलम् ॥ स हिरण्यानी निरत्नानि ॥ १० ॥ हिरण्यरूपा उषसो विरोक उ
भाविंद्रा उदिथः सूर्यश्च ॥ आरोहतं वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोसि वरु
णोसि ॥ ११ ॥ इति हिरण्यं क्षिप्त्वा ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमा
नः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः ॥ १२ ॥ इति वस्त्रेण रक्तसूत्रेण वा वे
ष्टयेत् ॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहा इषमूर्जं शतक्र
तो ॥ १३ ॥ इति धान्यपूर्णपात्रं तदुपरि स्थाप्य ॥ तस्मिन् तत्वायामीति मंत्रेण वरुण

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा०पू०॥ मावास्वस्वजयेत्॥ तत्वायामीतिशुनःशेफऋषिर्वरुणोदेवतात्रिष्टुप्छंदःकलशवरुणावाह
॥९॥ नेविनियोगः॥ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरु
णइहबोध्युरुशंसमानआयुःप्रमोषीः॥ ततःकलशेगंगाद्यावाहनंकुर्यात्॥ तत्रमंत्रः॥
सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आयांतुयजमानस्यदुरितक्षयकारकाः
ततःकलशाभिमंत्रणम्॥ तत्रमंत्राःकलशस्य०॥ मूलेतत्रस्थितो०॥ कुक्षौतु०॥ ऋग्वेदोथ०॥
अंगैश्चसहिताः०॥ ततःकलशप्रार्थना॥ देवदानवसंवादेमथ्यमानेमहोदधौ॥ उत्पन्नो
सितदाकुंभविधृतोविष्णुनास्वयम्॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥ त्व
यितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः
आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥ त्वयितिष्ठंतिभूतानियतःकामफलप्रदः॥ त्व ॥रामः॥
त्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥ सांनिध्यंकुरुदेवेशप्रसन्नोभवसर्वदा॥ ततोदे ॥९॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मंडपरूपंवास्तुकलशोपरिसंस्थाप्यपूजयेत् ॥ ततआचार्यःकुंडसमीपेगत्वान्वाधानं
कुर्यात् ॥ तत्रैवंदेवसमिधंगृहीत्वा ॥ अस्मिन्नवग्रहवास्तुकर्मणिदेवतापरिग्रहार्थं
मन्वाधानंकरिष्ये ॥ अस्मिन्नन्वाहितेग्नाविन्याहिचक्षुषीआज्येनेत्यंतमुक्त्वातत्र
प्रधानम् ॥ आदित्यंसोमंभौमंबुधंबृहस्पतिंशुक्रंशनैश्चरंराहुंकेतुंअमुकसंख्या
भिप काभिरर्काहिसमिद्भिस्तिलाज्याहुतिभिश्चव्याहुतिभिश्च ॥ ईश्वरंउमांस्कंदंहरिंविष्णुंब्रह्माणमिं
द्रंयमंकालंचित्रगुप्तमित्यधिदेवताः ॥ अग्निंअपःभूमिंविष्णुंइंद्रंइंद्राणींप्रजापतिंसर्पान्ब्र
ह्माणमितिप्रत्यधिदेवताः ॥ विनायकंदुर्गांवायुंआकाशंअश्विनौइतिलोकपालान् ॥ इंद्रादि
दिक्पालांश्चतिलाज्याहुतिभिरमुकसंख्याकाभिर्यक्ष्ये ॥ तथावास्तोष्पतिंप्रधानदेवतांवास्तो
ष्पतिइतिचतसृभिर्ऋग्भिःक्रमेणाष्टोत्तरशतंसमिद्भिःसर्पिषातिलाज्येनपायसेनचयक्ष्ये

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ततस्ताभिश्चतसृभिर्ऋग्भिर्वास्तोष्पते ध्रुवास्थूणामित्यनया ऋचा च प्रत्यृचं पंच विल्वफलै
स्तद्वीजैर्वा यजेत् ॥ तथा शिख्यादित्रिपंचाशद्देवताः ॥ शिखिनं १ पर्जन्यं २ जयंतं ३ कुलिशायु
धं ४ सूर्य्यं ५ सत्यं ६ भृशं ७ आकाशं ८ वायुं ९ पूषणं १० वितथं ११ गृहक्षतं १२ यमं १३
गंधर्वं १४ भृंगराजं १५ मृगं १६ पितॄन् १७ दौवारिकं १८ सुग्रीवं १९ पुष्पदंतं २० वरुणं २१
असुरं २२ शोषं २३ पापं २४ रोगं २५ अहिं २६ मुख्यं २७ भल्लाटं २८ सोमं २९ सर्प्पं ३०
अदितिं ३१ दितिं ३२ अपः ३३ सावित्रं ३४ जयं ३५ रुद्रं ३६ अर्य्यमणं ३७ सवितारं ३८
विवस्वंतं ३९ विबुधाधिपं ४० मित्रं ४१ राजयक्ष्माणं ४२ पृथ्वीधरं ४३ आपवत्सं ४४
ब्रह्माणं ४५ चरकीं ४६ विदारीं ४७ पूतनां ४८ पापराक्षसीं ४९ स्कंदं ५० अर्य्यमणं ५१
जृंभकं ५२ पिलिपिच्छं ५३ यवैर्वा कृष्णतिलैर्वा ॥ उदुंवरादिक्षीरवृक्षाः पिप्पलाशखदिरा
पामार्गकुशदूर्वाणामन्यतमसमिद्भिर्मधुसर्पिस्समन्विताभिर्वा सर्पिषा तिलाज्येन पा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

य सेन च प्रतिद्रव्यमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिं अष्टौ वा प्रत्येकं प्रणवादिनमोन्तैर्नाममंत्रैः श्रो
षेण स्विष्टकृतं यहुत्वा ॥ इत्यनेनमुक्त्वा ॥ ॐ भूर्भुवः स्वः स्वाहेति जुहुयात् ॥ ततः प्रणीता प्रणयनांतं कृत्वा
श्रीहिरण्यप्रतिदैवतं चतुरश्चतुरो मुष्टीन्निर्वपति ॥ अमुष्मै जुष्टं निर्वपामि ॥ एवं प्रोक्षणमप्यमुष्मै त्वा जु
ष्टं प्रोक्षामीति प्रोक्षयेत् ॥ प्रक्षालनानंतरं इदममुष्मा इति समं विभज्य स्थाल्यां पचेत् ॥ तत इध्माधाना
नंतरं यजमानेन द्रव्यत्यागे कृते नवग्रहपुरस्करउद्दिष्टद्रव्यैः उद्दिष्टसंख्यया शिष्यादि त्रिपंचाशद्दे
वताभ्यः ॥ वास्तोष्पतये च होमः कार्यः ॥ वास्तोष्पत इति च तस्मिन् वसिष्ठो वास्तोष्पतिस्त्रिष्टुभोन्या गा
यत्री होमे विनियोगः ॥ वास्तोष्पते ध्रुवा स्थूणामिति रिरिंविठिर्वास्तोष्पतिर्बृहती होमे विनियोगः ॥ ए
वं होमं परिसमाप्य स्विष्टकृद्धोमं नवाहुतीश्च हुत्वा ॥ इंद्रादिदिग्पालेभ्यः नवग्रहदेवेभ्यः ॥ बलिं हुत्वा
पूर्णाहुतिहोमं कुर्यात् ॥ तच्चैवम् ॥ प्रक्षालितपाणिपादः ॥ आचम्य देशकालौ स्मृत्वा कृतस्य वास्तु
होमस्य संपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ तत आचार्यः स्रुचि द्वादशगृ

वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानां ॥ द्रप्सः पुरां भेत्ता सास्वतीनामिंद्रो मुनीनां सखा ॥ ४ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥पा०पू०॥ ॥१२॥

म२

यक्ष्मरोगेत्र्यँपक्वमांसबलिर्नमः ॥४२॥ ॐ पृथ्वीधराय मांसबलिर्नमः ॥४३॥ ॐ आपवत्साय दधिबलिर्न
मः ॥४४॥ ॐ ब्रह्मणे पंचगव्ययवतिलाक्षतघृतदधि विविधभक्ष्यभोज्यबलिर्नमः ॥४५॥ ततो मंडलाद्
हिः ईशानकोणे ॥ ॐ चरक्यै माषभक्तदधि घृतसहित पद्मकेशर बलिर्नमः ॥४६॥ तत आग्नेय्याम् ॥ ॐ
विदार्यै एष माषभक्तसरुधिरहरिद्राबलिर्नमः ॥४७॥ ततो नैर्ऋत्यां ॥ ॐ पूतनायै एष दधिभक्तसरु
धिरास्थिखंडसंयुक्तपीतरक्तबलिर्नमः ॥४८॥ ततो वायव्ये ॥ ॐ पापराक्षस्यै एष मत्स्यमाषसुरासव
बलिर्नमः ॥४९॥ ततः प्रागादितः ॥ ॐ स्कंदाय सुरारुधिरबलिर्नमः ॥५०॥ दक्षिणे ॥ ॐ अर्यम्णे एष
माषभक्तबलिर्नमः ॥५१॥ पश्चिमे ॥ ॐ जृंभकाय मांसरुधिरबलिर्नमः ॥५२॥ उत्तरे ॥ ॐ पिलिपिच्छा
य सास्रकपद्मबलिर्नमः ॥५३॥ अथ साधारणबलिदानमंत्रः ॥ भूतानि यानीह वसंति तानि बलिं गृ
हीत्वा विधिवत्प्रयुक्तं ॥ अन्यत्र वासं परिकल्पयंतु क्षमंतु तान्यत्र नमोस्तु तेभ्यः ॥१॥ स्वर्गपातालमर्त्ये च ॥राम:॥
ये देवा वास्तुसंभवाः ॥ दत्तं त्विमं बलिं गृह्य तुष्टा यांतु स्वमंदिरम् ॥२॥ मातरो भूतवेताला ये चान्ये बलि ॥१२॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कांक्षिणः ॥ विघ्नोःपारिषदायेचनेपिगृह्णन्त्विमंबलिं ॥३॥ बलिंगृह्णन्तुमेदेवा आदित्यावसवस्तथा ॥
मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः ॥४॥ असुरायातुधानाश्चपिशाचाडाकिनीगणाः ॥
शाकिन्यायक्षवेतालायेचविघ्नविनायकाः ॥५॥ जगतांशांतिकर्त्तारोब्राह्माद्याश्चैवमानरः ॥ मांच
विघ्नंमांचरोगेमासंतुपरिपंथिनः ॥६॥ सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः ॥ एतैर्मंत्रैर्गृहाद्ब
हिर्बलिंहरेद्धान् ॥ ततोगृहमंडलंकुर्यात्तोरणाद्येश्चवर्णकैः ॥ रक्षोहणम्वलगहनम्वैष्णवीमिद
महन्तंवलगमुत्किरामियम्मेनिष्ट्यायममात्यानिचखानेदमहन्तम्वलगमुत्किरामियम्मेस
मानोयमसमानोनिचखानेदमहंतंवलगमुत्किरामियम्मेसबंधुर्यमसबंधुर्निचखानेदमह
तंवलगमुत्किरामियम्मेसजातोयमसजातोनिचखानोत्कृत्यांकिरामि ॥७॥ पवमानःसोअद्यनः
पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥८॥ स्तेनेनवास्तोष्पतेइतिचतुर्भिर्मंत्रैर्वाविच्छिन्नतंतु
नास्तत्रेणऐशानकोणाद्दारभ्यप्रदक्षिणक्रमेणपृष्ठवर्तिन्या उदककधारयासगृहंवेष्टयेत्

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा॰पू॰॥ ततआचार्यः प्रत्यङ्मुखो भूत्वा प्राङ्मुखं यजमानं शांतिकलशोदकेन वैदिकमंत्रैः सुरास्त्वामभि
॥१३॥ षिंचंत्विन्यादिवसिष्ठसंहितोक्तैर्मंत्रैश्च मंगलाभिषेकं कृत्वा सर्वौषधिभिः स्नापयेत् । ततआ
चार्य्यः पुनः पंचोपचारैः पीठस्थदेवतान्संपूज्य । वास्तुमंडलब्रह्मस्थाने दिव्याभरणभूषितेन मू
र्त्तीरूपां पृथ्वीदेवीं प्रणवव्याहृतिपूर्वकं चतुर्मुखं च देवमावाह्य संस्थाप्य पाद्याद्यैरुपचारैः
पूजयेत् । अथ यजमानः उदङ्मुखः गृहमध्ये आकाशपदे हस्तमात्रं अधः गर्त्तं खत्वा पूर्वादि नि
चतुर्दिक्षु प्रदक्षिणक्रमेण वह्निर्मृदं निक्षिप्य गोमयेनोलिप्य चंदनेन भूषयित्वा मध्ये शुक्ला
नि पुष्पाणि शुक्लाक्षतानाश्च निक्षिपेत् । ततश्चतुर्मुखं देवं ध्यात्वा तूर्य्यमंगलघोषैः कलशमानीय
जानुभ्यामवनिं गत्वा प्राङ्मुखः ॐ नमो वरुणायेति मंत्रेण घटमाघ्राय अर्घ्यं दत्वा ॐमिति स्मरन्
जलेनापूर्य्य । ततः शुक्लपुष्पाणि निक्षिप्य आहृतिं चिंतयेत् । दक्षिणावर्त्तैः पुष्पैः कुमं वामे विपरीतं ॥रा॰म॰॥
ततो हेमपेटिकां स्वर्णरत्नधान्यसेवालसंयुतां गृहमध्ये हस्तमात्रेण गर्त्तेन्यासाय निक्षिपेत् । कल ॥१३॥

माटिकीपेटरि आकाचि १ गडवा १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

३
शिख्यादित्रिपंचाशद्देवताभ्योनमः चंदनंसमर्पयामि। एवंपुष्पम्।। धूपम्। दीपं। नैवेद्यम्। आचमनीयं।। तांबूलम्।। ५।।

शस्थापितसुवर्णवास्तुप्रतिमांचनिक्षिपेत्।। तत्रमंत्रः।। सशैलसागरांपृथ्वींयथावहसिमूर्द्धनि।। तथा
मांवहकल्याणिसंपत्संततिभिःसह।। ततोवास्तुप्रार्थनांकुर्यात्।। तत्रमंत्रः।। पूजितोसिमयावास्तोशे
माद्यैरर्च्चनैःशुभैः।। प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखम्।। ततःपंचरत्नहरिद्राहेमंक्षिप्त्वाशाली
यवादिबीजैःक्षेत्रजादिमृत्तिकाभिश्चतत्स्थानंप्रयत्नतःपूजयेत्।। ततआचार्य्यःपुनःशिख्या
दिदेवताःपंचोपचारैःसंपूज्याग्निंचसंपूज्य।। यांतुदेवगणास्सर्वेपूजामादायपार्थिवीम्।। इष्टकाम
प्रसिद्ध्यर्थंपुनरागमनायच।। इतिपठित्वाविसर्जयेत्।। ततआचार्यायदक्षिणांसुवर्णमेदिनींगावःवा
सांसिदद्यात्।। ततोवस्त्रालंकारकुंभंचआचार्य्यायनिवेदयेत्।। देवस्यत्वेतिमंत्रेणमूर्तिदानंप्रकल्प
येत्।। शिल्पिभ्यश्चयथामानपुरःसरंयथालंकरणानिदद्यात्।। ततोब्राह्मणान्भोजयित्वा।। शिवं
वास्त्विति।। ३ वाचयित्वा।। तेभ्योदक्षिणांचदत्वा।। बंधुभिःसहसोत्साहोभुञ्जीत।। इतिवास्तुशांतिः।।
अथास्यफलम्।। एवंयःकुरुतेसम्यक्श्रीवास्तुपूजाविधानतः।। धनधान्यसमायुक्तोमोदतेचात्तमैः।

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥धा०पू०॥ सुनैः॥१॥ एवं सिंहगते भानौ पूर्णायां शनिवत्सरम्॥ स्वगेहे वास्तुपूजायां मंडले सकृतं क्रमम्॥२॥
॥१४॥ आबालमरणं व्याधिर्मृतपत्नादिकानि च॥ नसर्पपीडनान्योन्यकलहान्यशुभानि च॥३॥ पुत्र
पौत्रधनारोग्यपशुदासीसमृद्धिभाक्॥ अरोगो विजयी ख्यातश्चिरंजीवति तन्गृहे॥४॥ राजवेश्म
सु सर्वत्र तथा च महिषीगृहे॥ सचिवामात्यसेनानीभवने पुरे तथा॥५॥ विरध्यात्प्रति वर्षं
तु शान्त्यै सिध्येतु रे शिकः॥ नचेदुक्तान्यथारूपफलैः श्लोकशोऽनिशं भवेत्॥६॥ वास्तुपूजा
करणे निषेधोऽप्युक्तो यमेन॥ गृहादिकरणे यत्र नार्चितो वास्तुदेवतः॥७॥ तत्र शून्यं भवेत्सर्वं रहितो
धा४ ब्राह्मिभिर्हतं॥ तस्माद्वास्तुर्चनं कार्यं सम्यक् संपद्दमीप्सुभिः॥८॥ अन्यत्रापि॥ यद्वास्तुपूजार
हितं नहगं बलिं त्वनाच्छन्नगृहं विरूपं॥ कपाटहीनं न विशेद्घनस्तत्सर्वयमालयमेतदेवेति॥९॥ ॥समंगृह३
शो सारं तु वेहि मध्ये कनकशलाकया रत्नैर्वा नदभावे रजतफलपुष्पधान्यानामन्यतमेन वा॥ शं ॥राम॥
ना१ यशोवती२ कांता३ विमला४ प्राणवाहिनी५ सती६ सुमना७ नंदा८ सुभद्रा९॥ ॥१४॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नवमीमनेनिनवरेखाःश्रागायनोदक्षिणोपक्रमाः॥उदग्गपवर्गा विलिख्य॥ हरिणापा१॥सुभ्रनार॥
लक्ष्मी॥३॥विभूति॥४॥विमला॥५॥श्रिया॥६॥जया॥७॥काला॥८॥विशोका॥९॥चनर्वमीतिस्मृतावु
धैरितिनवरेखादक्षिणोत्तरायताः पश्चिमोपक्रमाः पूर्वापवर्गा विलिख्य॥ ततः शुल्कोशरका
हिनाताः सम्यक् निर्माय चतुःषष्टिकोष्ठोपेतं मंडलं विधाय मध्यगपदचतुष्टयमेकीकृत्य तत्
कोणचतुष्टयाद्बहिः कोणगरेखाभिः पदानि द्विधा विभज्य बहिः पंक्तौ ईशानपदे दक्षिणा
र्द्धे ऊर्ध्वमुखपतितवास्तुपुरुषशिरःस्थाने शिखिनमर्द्ध पदम्॥१॥ तद्दक्षिणपदे तदधोऽर्द्ध
पदे च दक्षिणतैव पर्जन्यं सार्द्ध पदम्॥२॥ तद्दक्षिणपदे तदधः पदे च दक्षिणाग्रे जयंतं द्विपदम्॥३॥
तद्दक्षिणपदे तदधः पदे च ऐशे कुलिशायुधं द्विपदम्॥४॥ तद्दक्षिणपदे तदधः पदे च दक्षिणा
२ सूर्य्य
वाहौ द्विपदम्॥५॥ तद्दक्षिणपदे तदधः पदे च प्रबाहो सत्यं द्विपदम्॥६॥ तद्दक्षिणपदे तदधःऽर्द्ध
पदे च दक्षिणवाहौ भृशं सार्द्ध पदम्॥७॥ तद्दक्षिणायनेपदार्द्धे प्रवाहावाकाशमर्द्ध पदम्॥८॥ त

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥वा०पू०॥ न्पश्चिमार्द्धे पदेप्रवाहौ वासुमर्द्ध पदम् ॥९॥ नन्पश्चिमपदे नउत्तरार्द्ध पदे च मध्ये पूषणमार्द्ध
॥२५॥ पदम् ॥१०॥ नन्पश्चिमपदे नउत्तरपदे च दक्षिणपार्श्वे वितथं द्वि पदम् ॥११॥ नन्पश्चिमपदे नउत्तर
पदे च गृहक्षतं द्वि पदम् ॥१२॥ तन्पश्चिमे नउत्तरपदे च दक्षिणोरुभागे यमं द्वि पदम् ॥१३॥ नन्पश्चिमप
दे नउत्तरपदे च जानुप्रदेशे गंधर्वं द्वि पदम् ॥१४॥ नन्पश्चिमपदे नउत्तरार्द्ध पदे च दक्षिणजंघायां भृंग
राजं सार्द्ध पदम् ॥१५॥ न दक्षिणे नैऋत्य पदार्द्धे दक्षिणस्फिकप्रदेशे मृगं सार्द्ध पदम् ॥१६॥ नउत्तरा
र्द्ध पादयोः पितृगणमर्द्ध पदम् ॥१७॥ नउत्तरपदे नन्पूर्वार्द्ध पदे च वाम स्फिकप्रदेशे दौवारिकं सार्द्ध प
दम् ॥१८॥ नउत्तरपदे नन्पूर्वपदे च वामजंघायां सुग्रीवं द्वि पदम् ॥१९॥ नउत्तरपदे नन्पूर्वपदे च वामजा
नुप्रदेशे पुष्पदंतं द्वि पदम् ॥२०॥ नउत्तरपदे नन्पूर्वपदे च वामोरौ वरुणं द्वि पदम् ॥२१॥ नउत्तरपदे नन्पूर्व
पदे च वामपार्श्वे असुरं द्वि पदम् ॥२२॥ नउत्तरपदे नन्पूर्वपदे च वामपार्श्वे शोषं द्वि पदम् ॥२३॥
नउत्तरवायव्यकोणपदार्द्धे पापमर्द्ध पदम् ॥२४॥ नउत्तरांप्रवाहौ रोगमर्द्ध पदम् ॥२५॥ नन्पूर्वपदे ॥रामः॥
न दक्षिणार्द्ध पदे च वाहौ अहिं सार्द्ध पदम् ॥२६॥ नन्पूर्वपदे न दक्षिणपदे च वामप्रवाहौ मुख्यं ॥१५॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

द्विपदम् ।२७। नत्पूर्वपदेन दक्षिणा स्तनपदे च वामबाहौ भल्लाटं द्विपदम् ॥२८॥ नत्पूर्वपदेन दक्षि
णापदे च वामबाहौ सोमं द्विपदम् ॥२९॥ नत्पूर्वपदेन दक्षिणपदे च वामबाहौ सर्पं द्विपदम् ॥३०॥
नत्पूर्वपदेन दक्षिणार्द्धपदे च वामश्रोनेऽदितिं सार्द्धपदम् ॥३१॥ नत्प्रागर्द्धपदे वामनेत्रे दितिम
र्द्धपदम् ॥३२॥ मध्यगईशानपदान्तरार्द्धपदे आपमर्द्धपदम् ॥३३॥ आग्नेयपदान्तरार्द्धे दक्षिणहस्ते
सावित्रमर्द्धपदम् ॥३४॥ नैर्ऋत्यपदान्तरार्द्धे जयमर्द्धपदम् ॥३५॥ वायव्यपदान्तरार्द्धे वामहस्ते रुद्रमर्द्ध
पदम् ॥३६॥ नत्प्राक्पदद्वये दक्षिणस्तने अर्य्यमणं द्विपदम् ॥३७॥ नदक्षिणपदार्द्धे दक्षिणहस्ते
सविनारमर्द्धपदम् ॥३८॥ नत्पश्चिमपदद्वये यठरन दक्षिणभागे विवस्वन्तं द्विपदम् ॥३९॥ नत्पश्चि
मार्द्धपदे मेढ्रे विबुधाधिपमर्द्धपदम् ॥४०॥ नउत्तरपदद्वये जठरवामभागे मित्रं द्विपदम् ॥४१॥ नउ
त्तरपदार्द्धे वामहस्ते राजयक्ष्माणमर्द्धपदम् ॥४२॥ नत्प्राक्पदद्वये वामहस्ते नले पृथ्वीधरं द्विप
दम् ॥४३॥ नत्प्राक्पदार्द्धे वक्षःस्थले आपवत्समर्द्धपदम् ॥४४॥ मध्ये हृदये ब्रह्माणं चतुष्पदम् ॥४५॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ पा० पू० ॥ एवं चत्वारिंशद्देवताः ॥ ततउत्तरे वास्तोष्पते ॥ इति कलशवास्तु ॥ ॐ भूर्भुवः स्वः शिखिनइहागच्छेत्या
॥ १६ ॥ दि पदार्थानुसमयेन ॥ वास्तुप्रकरणवाहितमात्रेन स्वस्वनाममंत्रेण गासनाद्युपचारैः पूजयेत् ॥ ततईशा
नकोणपदचतुष्टये मंडलाद्बहिः ॥ चरकीम् १ विदारीम् २ पूतनाम् ३ पापराक्षसीम् ४ पूजये
त् बहिरेव पूर्वादि दिक्षु क्रमेण स्कंदम् १ अर्यमणं २ जृंभकम् ३ पिलिपिच्छं च पूजयेत् ॥
इंद्रादिलोकपालांश्च ॥ एतच्चतुःषष्टिपदं वास्तुमंडलं प्रासादे गंतव्यम् ॥ तदुक्तं सोमशंभुना ॥
एकाशीतिपदं क्षेत्रवास्तु चैव यहादिषु ॥ चतुःषष्टिपदं वास्तु प्रासादे ब्रह्मणस्मृतम् ॥ इत्युक्त्वा मं
डपश्च राजवेश्म्यो ॥ प्रासादस्यानुरूपत इत्युक्तेनेनादर्शितं मंडले इतीदं वास्तुमंडलं अन्यत्र सर्वत्र
एकाशीतिपदमेव ॥ इति गोविंदपंडितकृता वास्तुपद्धतिः ॥ अथाश्वलायनसूत्रोक्तवास्तुप्र
शांतिः ॥ सुनिष्पन्ने कपाटवति गृहे उपलेपना ॥ उप[illegible]लेपनविना ॥ नध्वजपताकातोरणफ
लपुष्पकिशलयपूर्णकुंभैः ॥ अलंकृते गीतादिमंगलघोषैः सद्घोषिते व्रीहियवादिवीजसहिते पूर्ण ॥ रामः ॥
कुंभद्वाभ्यराग्रतः सरंध्योतिः शास्त्रोक्तमुहूर्ते गृहं प्रविश्य ॥ स्तंभं च हस्तेनालंकृतः ॥ सपत्नीकोजेंयं ॥ १६ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मानोवास्तुशांतिंकुर्यात्॥तत्रायंमंत्रः॥आचमनप्राणायामौकृत्वातिथ्यादिसंकीर्त्यास्यगृहस्य
सिद्ध्यत्वसिद्ध्यर्थंआश्वलाक्षोक्तांवास्तुशांतिंकरिष्ये॥इतिसंकल्प्य॥गणपतिपूजनादिनांदीश्रा
द्धंकृत्वाशिलान्यासंकुर्य्यात्॥सुचैवम्॥पूर्वस्यांदिशिचतस्रः शिलाःस्थापयित्वातासुदूर्वांनिधा
यतासुमणिकारव्यंजलधारणार्थंमांउविशेषंस्थापयेत्॥अनेनमंत्रेण॥पृथिव्याअधिसंभवेति
अरंगरोवावदीतित्रेधाबद्धोवरत्रपा॥इरामुहप्रशंसत्यनिरामपबाधतामिति॥अथमणिकंज
लेनपूरयेत्॥एतुराजावरुणोरेवतीभिरस्मिंस्थानेतिष्ठतुमोदमानः॥इरांवहंतोघृतमुक्षमाणा
मित्रेणसाकंसाहसंविसंत्वितिमंत्रेण॥ततोमणिकान्याग्नेतरेजलंगृहीत्वातत्रव्रीहीन्यवां
श्चप्रक्षिप्य॥हिरण्यंपंचनिधाय॥तेनशन्नइंद्राग्नीइतिसूक्तेनप्राचीमारभ्य॥प्रदक्षिणंत्रिः॥
परिव्रजन्गृहप्रोक्षणंकुर्य्यात्॥अत्रसूक्तस्यचआवृत्तिर्भवति॥शन्नइंद्राग्नीतिपंचदशर्चस्य
सूक्तस्यवसिष्ठऋषिर्विश्वेदेवादेवतात्रिष्टुप्छंदः गृहप्रोक्षणेविनियोगः॥पुनःप्रदक्षिणं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ वा०पू०॥ परिव्रजन्नविच्छिन्नया चोदकधारया॥ आपोहिष्ठेतिऋचेन प्रोक्षणं कुर्य्यात्॥ ऋचस्य उदकाहर
॥ १७ ॥ स्यचाहुतिर्भवति॥ आपोहिष्ठेतिऋचस्य अंबऋषिः सिंधुद्वीपऋषिः आपोदेवता गायत्री छंदः
गृहप्रोक्षणे विनियोगः॥ आपोहिष्ठामयोभुवइति॥ ततो गृहमध्ये तस्मात्पाकात्पूर्वं चरुश्रपणं
कुर्य्यात्॥ तत्र उपलेपादिस्तरणीपात्रनिधानांतं कृत्वा निर्वापप्रोक्षणे तूष्णीं विधाय चरुश्रपणादि
आघारांतं कर्म कृत्वा॥ स्रुवहानधर्म्मेण जुहुयात्॥ वास्तोष्पत इति चतसृणां वसिष्ठऋषिर्वास्तो
ष्पतिर्देवता आघारांते तिसृणां त्रिष्टुप्छंदांत्या गायत्री छंदो होमे विनियोगः॥ ॐ वास्तोष्पते प्रतिजा
नीह्यस्मानिति चतसृभिर्ऋग्भिर्हुत्वा स्विष्टकृदादि होमशेषं समापयेत्॥ ततो गृहे सिद्धा
न्नेन ब्राह्मणान्भोजयित्वा॥ शिवं वास्तु शिवं वास्त्विति भवंतो ब्रुवंत्विति तां वाचयित्वा तेन च शिवं वा
ति स्त्विति ब्रूयुः॥ यो पिशाचानरेणाहतं संस्कारविशीर्णं वा पुनः संस्कृत्य प्रविशति तस्यापि बीजस्था ॥ रा०म०॥
पन॥ शिलाद्रूर्वा मणिकप्रतिष्ठापनादि शिवं वास्त्वि[illegible]स्येन हुतं भवतीति॥ स्वस्त्यत्वा वास्तु शांति ॥ १७॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कर्म १

कृत्वा पुराणोक्तमपि कुर्यात्॥ गृह्योक्तहोमविधिना बलिं कुर्यात्॥ प्रासादवास्तुशमनं विधिर्यउ
क्त इति॥ मात्स्येऽभिधानादित्यलमतिपल्लवितेन॥ मेषशृंगादिधूपैश्च ध्वजदीपैस्तथैव च॥ सुरा
पोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः॥१॥ मत्स्यमांससुराहीनि ब्राह्मणानां विवर्जयेत्॥ सुरा
स्थाने प्रदातव्यं क्षीरसैंधवमिश्रितम्॥२॥ पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत्॥ इति॥
अथ वास्तुचक्रम्॥ शिवोक्तम्॥ वास्तुचक्रं प्रवक्ष्यामि महादेवेन भाषितम्॥ यस्मिन् संचरते भा
नुस्तन्नाडीत्रीणि मस्तके॥१॥ द्वौ २ द्वौ २ पादयोश्चैव स्थापयेत्त्रीणि ३ पृष्ठतः॥ दक्षकुक्षौ चचत्वा
रि ४ दद्याच्चत्वारि वामके॥२॥ षट् दद्यात्त्रीणि पुच्छे च नाशायां दक्षिनयेंतथा॥ नासायां स्वामि
नो मृत्युरुद्वासं चारपादयोः॥३॥ वामे कुक्षौ चहारिघ्रं स्थैर्य्यं पश्चिमपादयोः॥ हानिरोग
भयं पुच्छे याम्ये कुक्षौ धनागमम्॥४॥ शीर्षे पृष्ठे भवेल्लक्ष्मीर्वास्तुसारमिदं स्मृतम्॥ गृहा
रंभप्रवेशादि वास्तुचक्रं नियोजयेत्॥५॥ [illegible] वास्तुचक्रम्॥ अथ वह्निचक्रम्॥ अग्निचक्रं

हलि १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ वा०पू० ॥ प्रवक्ष्यामिवृषशिष्टेनैवभाषितम् ॥ वाराऽर्कहस्तयुग्मेनातिथिवारसमन्विता ॥ १ ॥ मत्स्यद्वीपाववनिर्मुक्ताच
॥ १८ ॥ तुर्मुगसमन्विता ॥ अग्निभिश्चहरेद्भागंशेषंवैश्वानरोभवेत् ॥ २ ॥ एकेनवसतेस्वर्गेद्वाभ्यांपातालमे
वच ॥ शून्येमर्त्येविजानीयाद्देवघ्नानलउच्यते ॥ ३ ॥ स्वर्गेभवतिचोत्पातःपातालेचधनक्षयः ॥ मृत्युलोके
भवेत्सौख्यमेवंघ्नानलउच्यते ॥ ४ ॥ इत्यग्निचक्रम् ॥ अथवास्त्वनुक्रमणिका ॥ कुंभस्थापनम् ॥ पुण्या
हवाचनम् ॥ मातृपूजनम् ॥ नांदीश्राद्धम् ॥ आचार्यादिवरणम् ॥ गौरसर्षपविकिरणम् ॥ पंचगव्यप्रो
क्षणं ॥ शिलास्थापनम् ॥ मणिकास्थापनम् ॥ गृहप्रोक्षणम् ॥ अंकुरोपणम् ॥ माषभक्तबलिः ॥
वस्त्रादौवास्तुमंडलंकृत्वा ॥ अग्निस्थापनम् ॥ नवग्रहस्थापनम् ॥ कलशस्थापनम् ॥ वास्तुदेवता
स्थापनम् ॥ कलशस्थापनम् ॥ अन्वाधानम् ॥ प्रधानहोमः ॥ स्विष्टकृन्नवाहुतिश्च ॥ बलिदानम् ॥
पूर्णाहुतिः ॥ पूर्णपात्रविमोकः ॥ वास्तुबलिदानम् ॥ गृहसूत्रवेष्टनम् ॥ अभिषेकः ॥ कुंभपूज
नम् ॥ वास्तूपशमनम् ॥ पुनःपीठदेवतापूजनम् ॥ अग्निपूजनम् ॥ आचार्यादिपूजनम् ॥ वास्तु ॥ रामः ॥
हवनम् ॥ वास्तुदानंरौप्यमयीम् ॥ ब्राह्मणभोजनम् ॥ इतिवास्त्वनुक्रमणिका ॥ ० ॥ संवत् १८६९ ॥ १८ ॥

लोहेकेकाट।४।वडेअंगुलआठ।घृतभातु।कमलपुष्प।पीतध्वज।१।यवके पीशानकूँचे पंचरत्न।१

वा०पू०
१९

अथवास्तोष्पतेदेवताविधिः॥वास्तुपुरुष॥२॥सुवर्णका॥१॥रौप्यका॥१॥काचिहाडी॥१॥दधिसेर्वरू॥पीशा
नकावस्त्र॥चरखालालवास्त्रेन॥१॥घृतगोधूम॥मछुरी॥सोहारी॥चनेकेलोवा॥रहिलाकोट्टि॥उल॥
भातु॥मधुमाषीभातु॥मिश्रीभातु॥चंदनभातु॥मेढाकेजीभ॥जवके वाट॥षीचरी॥दन्तून॥साठी
काभातु॥पुआ॥जाउरि॥कुश॥कमलपुष्प॥शोनमध्य॥गोदुग्ध॥सैन्धव॥गोधामांस॥घीउ॥लेडु
आ॥फलफूल॥घृतकेवल॥मृगभातु॥मधुमाषीजाउरि॥चौरीठ॥कचौरी॥गोदुग्ध॥गोदधि
मिरिचकुशोदक॥गुडभृजाउरि॥पंचगव्य॥गोदधि॥गोदुग्ध॥गोघृत॥गोमूत्र॥गोमयेतिपंच॥जवका
पिशानु॥तिलाक्षत॥सोहारी॥कचौरी॥दूर्वा॥षीरभातु॥डरिदवल्माका॥कमलकेकिंजल्क॥रुधिर
मांस॥मघएदहे॥इतिवास्तुदेवताबलिः॥यवगोधूमधान्यानि तिलाः कंगूस्तथैवच॥स्यामकं चीन
कं चैव सप्तधान्यंप्रकीर्त्तितम्॥अन्नसप्त॥७॥समिधे॥पालास॥२४०॥ओडुंवर॥२४०॥दूर्वा॥२४०॥
जवाहुति॥२४०॥तिलाहुति॥२४०॥फलश॥६॥केला॥६॥खारुवाहस्तसप्त॥७॥नारियर॥अगोछा॥६॥
अन्यपद्धतेरुक्तम्॥आश्विनेशुक्लपक्षेद्वादश्यांभृगौअस्मिन्दिने समाप्तं शुभमस्तु शुभमस्तु॥ रामः
१९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अथयद्यैवंतुलायदक्षिणोवेधंतःसपत्साधुक
रोतितदंतवैघथयदिसाधुतदहिर्वेदितस्मा
दक्षिणंवेधंतमधिस्यःस्पवासीततुलाया
धं९हवाअमुष्मिंलोकस्मादधियतरघन्न
स्यति॥तदंवेष्यतियदिसाधुवासाधुवेत्य
थयएवंवेदास्मिन्हैवल्लोकेतुलाधनंमुच्य
तेसाधुकृत्याहैवास्येयछतिनपायकृत्या
२तुलाधिरोहणे॥इमांकरिडकांपठेत्॥
तण्डुलार्द्धंयवाःप्रोक्ताःयवार्द्धंतिलमिश्रि
तम्॥शर्करातिलसाम्यंचआज्यभाग
चतुष्टयम्॥१॥चतुर्भागास्तिलाःप्रो
क्तास्त्रिभागंयवमेवच॥द्विभागंचतण्डु
लंज्ञेयंभागमेकंचतण्डुलम्॥२॥
तदर्द्धंशर्कराज्ञेयागुग्गुलादितदर्द्ध
कम् दशभागकृतेहोमेजायतेसिद्धि
रुत्तमा॥३॥अन्यच्च॥शुद्धानांतिल
कृष्णानांभागोभागोयवस्यच॥
तदर्द्धंतण्डुलाःप्रोक्तास्तदर्द्धेनैवश
र्करा॥४॥यवसाम्यंभवेद्वृद्धिर्यवा
धिक्येधनक्षयः॥तस्मात्सर्वसमा
नेचसंग्राह्योमुनिसत्तमैः॥५॥

इति मासादितुलापद्धतिः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri